National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 241-242
© 2025 NJHSR
www.sanskritarticle.com

**डा. हेमन्त कुमार मुदुलिः**
प्राध्यापकः, व्याकरणविभागः,
विजयचान्दसंस्कृतमहाविद्यालयः,
समागोलम्, कुजङ्गम्, जगतसिंहपुरम्

**Correspondence:**
**डा. हेमन्त कुमार मुदुलिः**
प्राध्यापकः, व्याकरणविभागः,
विजयचान्दसंस्कृतमहाविद्यालयः,
समागोलम्, कुजङ्गम्, जगतसिंहपुरम्

# भावादिकर्मकर्तृप्रक्रियायाः प्रयोगविज्ञानम्

**डा. हेमन्त कुमार मुदुलिः**

भाषा भावाभिधानक्षमा कालेन स्वविकाशमहिम्ना विभिन्ना अतः सार्वजनीनता यथा तत्र उदिता भवेत् तदर्थं शृङ्खलस्य आवश्यकता अभिरूचिपुरस्सरं तस्या एव भाषायाः संघटनं संस्थापनं च जायते । सर्वथा परिवर्त्तनपथे जनैरुपपादितवैभवेन भाषा समुल्लसति इति भाषाविज्ञानविदां विवेचनम् ।

भाषायाः परीक्षणं स्वरूपचिन्तनं वा यदा क्रियते तदा पूर्णभावाभिधानक्षमं वाक्यमेव समागच्छति। क्रिया-कारकसंम्बन्धमादाय एकस्मिन् परिधौ वाक्यं आविर्भवति। भावस्य उपयोजनं विकशति। वाक्यस्य विवेचनं भाषायाः संघटनप्रक्रियायाः आहरणमाकलनं च तेनैव क्रमेण संस्कृतभाषायाः विश्लेषणं क्रियते चेत् विभावद्वयं तत्रैव आपतति। वैदिकभाषा लौकिकभाषा चेति सर्वप्राचीना अनादि अनन्ता एषा भाषा वैदिकभाषा नाम्ना समायाता सती क्रमेण विकशपथे उपगता। संकोचनं प्रकाशनं विकाशनं चेति आदाय तत् स्वरुपेण आविर्भूता येन विभाजनं द्वयं वैदिकी लौकिकी चेति भावेन विन्यस्ता। तत्र वाक्यविन्यासः उपायचतुष्टयेन आकल्यते –

१.कर्त्तृप्रक्रिया
२.कर्मप्रक्रिया
३.भावप्रक्रिया
४.कर्मकर्तृप्रक्रिया चेति ।

एतासां चतसृणां प्रक्रियाणां विवेचनं भाषायाः तस्याः वैदिक लौकिक इति विभावमादाय यत् प्रवर्तनं तदेव तद् वाक्यमहिम्ना अपेक्षते । वाक्ये क्रियापदसंघटनं कालस्य संरचनं कर्त्तृकर्मादिकारकाणां विनियोजनं विभाक्तिसन्निवेश इति एतद् सर्व वक्तुः विवक्षया अभिरुच्या कालमहिम्ना च उपगम्यते । कदा कर्त्तृप्रक्रियायाः कृते अभिरुचेः बाहुल्यं कदा च कर्मप्रक्रियायाः बाहुल्यं कर्मकर्त्तृप्रक्रियायाः आश्रयणं भावप्रक्रियायाः विश्लेषणं च प्रादुर्भवति । संस्कृतभषायाः एतद् परीक्ष्य समयक्रमेण कथं विकशनं वा जातम् तत् साधनाय अत्र प्रबन्धे सोपानत्रयेण विचारितम्।

१.वैदिकसंस्कृतभाषायां संघटितप्रक्रिया
२.लौकिकसस्कृतभाषायाः संघटितप्रक्रिया
३.विंशशताब्दीं यावत् कर्मादिप्रक्रियाणां संघटनम्

तेषु अत्र केवलं इर्त्यधकृत्य विस्तारः प्रतिपाद्यते ।

According to J.L.Kamboj -
Language moves down time to time in account of its making nothing is perfectly Static. Every word every grammatical element every locution every sound and accent is a slowly changing configuration.
The progressive civilization makes it necessary and only from new words but also to add fresh meaning to old ones.

अत्र प्राकृतिकवैभवं सांस्कृतिकसौरभं च आदाय संस्कृतभाषा विश्वविलोकनाय समारब्धा समागता च। यस्यां वेदाः उपनिषदः ब्राह्मणग्रन्थाः आरण्यकाश्च रचिताः वर्त्तन्ते। सर्वा वैदिकी संस्कृतभाषा अस्याः

उत्थापनं प्रचलनं च रामायणरचनाकालतः पूर्ववर्तिसमयं यावत् प्रवृत्तमासीत्। प्रायशः ५००० ख्री.पू. शताब्दी ततश्च पाणिनिकालदारभ्य रामायणकालदारभ्य वा अधः यावत् लौकिकीसंस्कृतभाषा उत्थानं पतनं च पन्थानमाश्रित्य प्रवर्त्तते। तेषां सर्वेषाम् समासेन आकलन-मादाय कर्त्तृकर्मभावादिविवेचनमन्वीष्टव्यं जायते।

**१. वैदिकसंस्कृतभाषायाः संघटितप्रक्रिया-**

यस्या कस्याचित् भाषायाः संघटने उपादानानि विचार्यन्ते। पदं तु आद्यं सोपानं पदसंघटने प्रकृतिः प्रत्ययाः विभक्तयः इति समयक्रमेण शब्दानुशासनोदिष्टविभावाः लक्ष्यीक्रियन्ते। वैदिकभाषायाः एतदेव आदाय भावानां स्फुटनं अप्रतिहतमेव। कर्मकर्त्तृभावादिप्रक्रियाणां वैदिकभाषायां दृश्यते। तदेवमादाय वैदिकभाषा नाम वैदिकं वाक्यम्। वैदिकसाहित्ये धार्मिकचेतनामाध्यात्मिकविभावानाम् अवतरण-मवधीयते। समासेन तस्य ऐतिह्यं तत्र कर्मकर्तृप्रक्रियायाः संघटनमिति विषयविन्यासमादाय विवेचनमिष्यते ।

**२. वैदिकयुगः मुख्यतया त्रिविधः-**

१. संहितायुगः

२. ब्राह्मणयुगः

३. सूत्रयुगः

१.संहितायुगः –

ऋषयः वैदिककाले येषां मन्त्राणां स्वरुपं ददर्शुः ।तेषां सन्निवेशेन संहितायाः एव वर्त्तते ।

संहिता चतुर्विधा –

**१.** ऋग्वेदसंहिता

**२.** यजुर्वेदसंहिता

**३.** सामवेदसंहिता

**४.** अथर्ववेदसंहिता

**१. ऋग्वेदसंहिता –**

१. कर्त्तृप्रक्रिया – तस्मात् यज्ञात् सर्वहुतः रुचः सामानि जज्ञिरे ।

२. कर्मप्रक्रिया – यद् वै यज्ञस्य साम्ना यजुषा क्रियते ।

३. भावप्रक्रिया – जघन्वाँ इन्द्रमिचेरुचोद प्रवृह्व हरिवी अदाशून्।

२. **यजुर्वेदसंहिता –**

१. कर्त्तृप्रक्रिया -पुनन्तु मा पितरः स्वोभ्यासः पुनन्तु मा पितामहः पुनन्तु प्रपितामहः पवित्रेण शतायुषाः ।

२. कर्मप्रक्रिया -मधुवाता ऋतायन्ते।

३. भावप्रक्रिया – उज्ञाते जातमन्धसोदिविसदूभम्म्या ददे उग्रा शर्म्ममाहिशश्रवः ।

**३. सामवेदसंहिता –**

१. कर्त्तृप्रक्रिया- उद्गातेव शकुनेः सामयायासि अग्नि दूतं वृणीमहे होतारं विश्वदेवसम्।

२. कर्मप्रक्रिया -वच्यन्ते वां ककुहासो जूर्णायामधि विष्टये यद्वारथो सायणभाष्य -३

३. भावप्रक्रिया – यावित्था श्लोकमादिवी ज्योतिर्जनाय चक्रधु आ न ऊजवहतमश्विना युवम्- सायणभाष्य-३।

**४. अथर्ववेदसंहिता –**

१. कर्त्तृप्रक्रिया – येन हस्ती वटसा संवभूव येन राजा मनुष्ये स्वपयन्तः।

२. कर्मप्रक्रिया – भूम्यांदेवेभ्यो ददाति यज्ञं हव्यमरंकृतम् ।

३. भावप्रक्रिया – एधन्ते अस्या ज्ञातयः पतिर्वन्धेषु वध्यते – चतुर्दशकाण्ड-२६

भाषा स्वविकाशमहिम्ना प्रतियुगं भिन्ना च भिन्ना च भवति । अभिरुचि पुरसरं तस्या एव भाषायाः सङ्घटनं संस्थापनं च जायते । सर्वथा परिवर्त्तनपथे जनैरुपपादितवैभवेन भाषा समुल्लसति इति भाषाविज्ञानविदां विवेचनम् । तथा च उक्तम् भाषायाः परीक्षणेन स्वरुप चिन्तनेन पूर्णभावप्रकाशनंयोग्यं वाक्यमेव निष्कर्षति। तत्र भाबस्य उपयोजनं विकशति तत्र बाक्यस्य विवेचनेन संस्कृतभाषायाः विश्लेषणेन च विभावद्वयं भाषापथे समागच्छति। यथा वैदिक लौकिकी भाषा च तत्र सर्व प्राचीना अनादि अनन्ता या भाषा सा वैदिकी भाषा क्रमेण भाषाविकाशपथे उपगता भवति। एतस्या वैदिक-भाषायाः भावादि-प्रक्रिया-माध्यमेन प्रवन्धेऽस्मिन् सोदाहरणं समुपस्तापितम्।

**सहायकग्रन्थसूची-**


१.उ.वा -१/२/२

२. ऐ.आ. -१/२/१०

३. इ.उ मन्त्रसंख्या -१/१

४. के.उ.-मन्त्रसंख्या -१२/४

५. क.उ -मन्त्रसंख्या -१/१

६. प्र.उ -मन्त्रसंख्या -१/१४

७.श्वे.उ. मन्त्रसंख्या -४/17

८. श्वे.ए मन्त्रसंख्या-५/१३

९. रू.उ मन्त्रसंख्या -१/३४

१०. मै.उ मन्त्रसंख्या -२/२

११.अपृक्त एकालप्रत्यय -१/२/४१

१२. अथर्वदधातुर प्रत्ययः प्रतिपदिकम्-१/२/४५